## स्वामिन्नैश्वर्ये। (१२६/१७३२)

स्वामिन् इति निपात्यते ऐश्वर्ये गम्यमाने। स्वशब्दाद् ऐश्वर्यवाचिनो मत्वर्थे [1]आमिन् प्रत्ययो निपात्यते। [2]स्वमस्यास्ति इति ऐश्वर्यमस्यास्ति इति स्वामी। [3]स्वामिनौ। स्वामिनः। ऐश्वर्ये इति किम्? स्ववान्॥

## अर्शआदिभ्योऽच् (१२७/१९३३)

अर्शस् इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच् प्रत्ययो भवति मत्वर्थे। अर्शांसि अस्य विद्यन्ते अर्शसः। [4]उरसः। आकृतिगणश्चायम्। यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत्सर्वमिह द्रष्टव्यम्।

अर्शस्। उरस्। तुन्द[5]। चतुर। पलित। जटा। घटा। अभ्र। [6]कर्दम। आम। लवण। 'स्वाङ्गाद्धीनात्' (ग.सू. १३४)। 'वर्णात्' (ग.सू. १३५)। अर्शआदिः॥

## द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः। (१२८/१९३४)

द्वन्द्वः समासः। उपतापो रोगः। गर्ह्यं निन्द्यम्। तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिभ्यः[7] इनिः प्रत्ययो भवति मत्वर्थे। द्वन्द्वात् तावत् – कटकवलयिनी। [8]शङ्खनूपुरिणी। उपतापात् – कुष्ठी। किलासी[9]। गर्ह्यात् – [10]ककुदावर्ती। [11]काकतालुकी। प्राणिस्थात् इति किम्? पुष्पफलवान् वृक्षः। प्राण्यङ्गान्नेष्यते, पाणिपादवती। अतः इति अनुवर्तते। तेनेह न भवति, चित्रललाटिकावती। सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम्॥

## वातातिसाराभ्यां कुक् च। (१२९/१९३५)

वातातिसारशब्दाभ्यां इनिः प्रत्ययो भवति,[12] तत्संनियोगेन च तयोः कुगागमो भवति। वातातिसारयो[13]-रुपतापत्वात् पूर्वेणैव सिद्धे प्रत्यये कुगर्थमेवेदं वचनम्। वातकी। [14]अतिसारकी।

[६००] पिशाचाच्चेति वक्तव्यम्। (म.भा. २.४००)

पिशाचकी वैश्रवणः। रोगे चायमिष्यते। इह न भवति, वातवती गुहा॥

## वयसि पूरणात्। (१३०/१९३६)

इनिरनुवर्तते। [15]पूरणप्रत्ययान्तात् प्रातिपदिकात् इनिः प्रत्ययो [16]भवति मत्वर्थे वयसि द्योत्ये। पञ्चमोऽस्यास्ति मासः संवत्सरो वा पञ्चमी उष्ट्रः। नवमी। दशमी[17]। सिद्धे सति नियमार्थं वचनम्, इनिरेव भवति, [18]ठन् न भवति [19]इति। [20]वयसि इति किम्? पञ्चमवान् ग्रामरागः॥

---

1. इनिच् क. फ, आमिनिच् ड. 2. स्वम् ऐश्वर्यं इत्यधिकम् ड. 3. स्वामिनौ नास्ति ब. ग. 4. नास्ति क. 5. तुलित इत्यधिकम् ह. 6. कर्दम नास्ति ह. 7. प्रातिपदिकेभ्यः इत्यधिकम् फ. 8. शङ्खनाशंसलूप्रेरिणी फ. 9. शूली कदन्नसेवनात् इत्यधिकम् क. 10. ककुदावर्तिनी कन्या क. 11. काकतालुकिनी फ, हयः इत्यधिकम् क. 12. मत्वर्थे इत्यधिकम् क. ड. फ. 13. शब्दयोः इत्यधिकम् फ. 14. अतीसारकी ड. 15. पूरणप्रत्ययात् क. 16. नियम्यते ड. 17. वृद्धः इत्यधिकम् ड. 18. ठन् न भवति नास्ति क. फ. 19. इति नास्ति ह. 20. वयसि–ग्रामरागः नास्ति फ.